दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-101 | 1 | फरवरी 01, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् माघशुक्लपूर्णिमा
माघ 19 प्रविष्टांशः मङ्गलमयः भवेत्

2 राज्यसभा-सांसद सुनेत्रा पवार महाराष्ट्रराज्यस्य प्रथम-महिला-उपमुख्यमन्त्रिरूपेण शपथं गृहीतवती

3 सर्वाणि- अवशिष्ट- विकासकार्याणि आगामी त्रिमासेषु पूर्णानि भवन्तु'- मुख्यमन्त्रिणः अधिकारिभ्यः निर्देशाः

5 कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयस्य नवत्रिंशत (३९) विद्यार्थिनां 'इम्वर्स ए. आई.' संस्थायां प्रशिक्षुतायै चयनम्

## लोकसभायां आगामि-सत्रस्य आयव्यय-प्रपत्रं प्रस्तोष्यति वित्तमन्त्री निर्मला सीतारमणः



वित्तमन्त्री निर्मला सीतारमणवर्या लोकसभायां आगामि-सत्रस्य आयव्यय-प्रपत्रं प्रस्तोष्यति । निम्न-सभायां आय-व्यय-प्रपत्रस्य प्रस्तुती-करणानन्तरं आय-व्ययिकस्य प्रतिलिपिः राज्यसभायां प्रस्तोष्यते । नवदशोत्तर-द्विसहस्र-तमाब्दे पदभार ग्रहणात् आरभ्य श्रीमत्या सीतारमण-वर्यया एतत् निरन्तरं नवमं आयव्ययिकं प्रस्तूयते ।

## सावित्रीठाकुरः न्यूयार्क-नगरे संयुक्तराष्ट्र-सङ्घ-मुख्यालये भारतीय-प्रतिनिधि-सङ्घस्य नेतृत्वं करिष्यति

महिला-बाल-विकास-राज्यमन्त्री सावित्रीठाकुरः न्यूयार्क-नगरे संयुक्तराष्ट्र-सङ्घ-मुख्यालये संयुक्तराष्ट्र-सङ्घस्य सामाजिकविकास-आयोगस्य चतुष्षष्टि-तमे सत्रे भारतीय-प्रतिनिधि-सङ्घस्य नेतृत्वं करिष्यति । अग्रिम-मासस्य द्वि-दिनाङ्कात् आरभ्यमानं सत्रं सामाजिक-समावेशनम्, समता, कल्याणोन्मुख-नीतयः चेत्यादिषु सामाजिक-विकास-विषयेषु अन्ताराष्ट्रिय-सहयोगं प्रवर्धयितुं केन्द्रितम् अस्ति ।

## एन. ई. ई. टी., पी. जी. इत्यस्य तृतीया परामर्श-प्रक्रिया पुनः आरब्धा

स्वास्थ्यसेवा-महानिदेशालयः सूचितवान् यत् एन. ई. ई. टी., पी. जी. इत्यस्य तृतीया परामर्श-प्रक्रिया पुनः आरब्धा । सामाजिक-सञ्जाल-माध्यमेन स्वास्थ्यसेवा-महानिदेशालयः अवदत् यत् नूतनानां पञ्जीकरणानां सौविध्येन सह परामर्शप्रक्रिया पुनः आरब्धा । सः अवदत् यत् अतिरिक्तानि आसनानि अपि समाविष्टानि सन्ति, येन योग्यानां अभ्यर्थिनां कृते अधिकाः अवसराः उपलप्स्यन्ते। अभ्यर्थिनः परामर्श-प्रक्रियायां भागं गृहीत्वा तदनुसारं स्वेच्छाम् आचरन्तु इति निदेशालयः अकथयत्। अधिक-विवरणानि चिकित्सा-परामर्श-समित्याः सञ्जालपुटे उपलभ्यन्ते ।

# यूरोपीयसङ्घं प्रति भारतस्य निर्यातः पञ्चवर्षेषु द्विगुणितं भवितुं शक्नोति -विदेशमन्त्रीपीयूषगोयलः



भारत-यूरोप-मुक्तव्यापार-सन्धिना यूरोपीयसङ्घं प्रति भारतस्य निर्यातः पञ्चवर्षेषु द्विगुणितं भवितुं शक्नोति इति विदेशमन्त्रीपीयूषगोयलः प्रोक्तवान् । श्री गोयल्-वर्यः व्यापारिणः, एम्. एस्. एम्. ई.-संस्थाः, स्टार्ट-अप्-संस्थाः, उद्यमिनः च अन्ताराष्ट्रिय-स्तरे गन्तुं ध्यानं दातुम् च प्रार्थितवान् । सामाजिक-सञ्चाल-माध्यमेन-लिखितानां लेखानां श्रृङ्खलायां प्रमुख राष्ट्रिय दैनिकपत्रिकाभिः सह स्वस्य साक्षात्कारं व्यञ्जयन् मन्त्रिवर्यः एतत् उक्तवान्। श्रीगोयलः इत्यपि अकथयत् यत् कथं व्यापार-व्यवहारः देशाय विभिन्नरूपेण लाभप्रदः भविष्यति । सः अवदत् यत् भारत-यूरोपीयसङ्घ-सन्धिः एका प्रबला एफ़. टि. ए. इति अस्ति या देशस्य संवेदनशील-क्षेत्राणां रक्षणं कुर्वती भारतस्य कृते प्रमुखान् अवसरान् उद्घाटयिष्यति ।

# प्रधानमन्त्री नरेन्द्रमोदी अरबदेशानां विदेशमन्त्रिणां प्रतिनिधिमंडलेन सह मेलनम् अकरोत्



प्रधानमन्त्री नरेन्द्रमोदी अरबदेशानां विदेशमन्त्रिणां, अरबलीग इत्यस्य महासचिवस्य अरब-प्रतिनिधि-मण्डल-प्रमुखानां च एकेन प्रतिनिधिमंडलेन सह मेलनम् अकरोत्, यत् भारत-अरब-विदेश-मन्त्रिणाम् उपवेशनाय नवदिल्ल्याम् अस्ति । उपवेशनावधौ, प्रधानमंत्रिणा भारत-अरबराष्ट्रयोः मध्ये सुदृढैतिहैसिक-सम्बन्धेषु बलम् प्रदत्तम्। प्रधानमंत्रिणा मोदिना फिलिस्तीनस्य नागरिकेभ्यः भारतस्य निरन्तर-समर्थनं पुनरुच्चारितम् सहैव गाजा-शांति-योजना-सहितं प्रवर्तमानाः शान्तिप्रयासाः अपि भारतेन समर्थिताः । सः क्षेत्रीय-शांत्यै स्थिरतायै च प्रयासानां समर्थनं कर्तुं अरब-समूहेन निभालितायाः महत्वपूर्ण-भूमिकायाः प्रंशसाम् अकरोत् ।

# आतङ्कवादं विरुध्य शून्य-सहिष्णुता इति अपरिवर्तनीयः सर्वस्वीकार्यः मानदण्डः भवेत् -विदेशमन्त्री

हिमसंस्कृतवार्ताः। विदेशमन्त्री डा. एस्. जयशङ्करः उक्तवान् यत् आतङ्कवादं विरुध्य शून्य-सहिष्णुता इति अपरिवर्तनीयः सर्वस्वीकार्यः मानदण्डः भवेत् । नवदिल्ल्यां प्रवर्तमाने द्वितीय-भारत-अरब-विदेश-मन्त्रिणाम् उपवेशने स्वकीये प्रारम्भिक भाषणे डा. जयशङ्करः अवदत् यत् आतङ्कवादस्य सर्वरूपाणि, अभिव्यक्तिः च भारत-अरब-राष्ट्रयोः कृते सामान्या विभीषिका अस्ति । पारेसीमम् आतङ्कवादः विशिष्टरूपेण अस्वीकार्यः अस्ति यतः एषः अन्ताराष्ट्रिय-सम्बन्धानां कूटनीतेः च मूलसिद्धान्तानाम् उल्लङ्घनं करोति इति सः अकथयत् । सः इत्यपि अवदत् यत् आतङ्कवादेन पीडितस्य समाजस्य स्वकीयाः आत्मरक्षायाः मौलिकाधिकारः अस्ति, तथा च प्रबुद्धसमाजः अवश्यमेव तस्य अधिकारस्य प्रयोगं करिष्यति । सः अस्य वैश्विकप्रकोपस्य निवारणार्थम्, अन्ताराष्ट्रिय-सहयोगस्य सुदृढीकरणस्य आवश्यकतायाः च विषये अवधानं दत्तवान् । डा. जयशङ्करः अवदत् यत्, ते एकस्मिन् महत्त्वपूर्ण-समये तदा एकत्रीभवन्ति यदा विविध कारणैः वैश्विक-व्यवस्थायां परिवर्तनं प्रचलति, तथा च राजनीतिः, अर्थशास्त्र, प्रौद्योगिकी, जनसाङ्ख्यिकी च सर्वाः पूर्णतया सक्रियाः सन्ति । जयशङ्करः अवदत् यत् सूडान्, यमन्, लेबनान्, लिबिया इत्येतेषां देशानां स्थितिः अपि सामूहिक रूपेण ध्यानं दातुं योग्या अस्ति । सः अवदत् यत् सिरिया-देशस्य घटनायाः दिशा अपि क्षेत्रस्य कल्याणाय महत्त्वपूर्णा अस्ति ।

## सुभाषितम्

**ऊषरेषु च क्षेत्रेषु,**
**यथा बीजो हि निष्फलम्।**
**उपकारोऽपि नीचानां,**
**कृतो भवति तादृशः।।**
**-महासुभषितसंग्रह**

भावार्थः- जिस प्रकार एक ऊसर खेत में फसल उगाने के लिये बीज बोना व्यर्थ होता है, उसी प्रकार नीच व्यक्तियों के प्रति कोई उपकार करना भी व्यर्थ ही होता है क्योंकि वे उसका लाभ नहीं उठाते हैं।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## सूरजकुण्ड-अन्तर्राष्ट्रीय-शिल्पमहोत्सवः सूरजकुण्ड-क्षेत्रे आरब्धः

उनचत्वारिंशत्तमः सूरजकुण्ड-अन्तर्राष्ट्रीय-शिल्पमहोत्सवः सूरजकुण्ड-क्षेत्रे आरब्धः। "स्थानीय से वैश्विक आत्मनिर्भर भारत" इत्यनेन विषयेन सह उपराष्ट्रपतिः सी. पी. राधाकृष्णनवर्यः अस्य शिल्पमेलकस्य उद्घाटनम् अकरोत् । ईजिप्ट्-देशः अस्मिन् वर्षे अपि चतुर्थवारं सहभागीदेशः अस्ति। एतदतिरिच्य, उत्तरप्रदेशस्य मेघालयस्य च समृद्ध-सांस्कृतिक-लोककलानां च प्रदर्शनं मेलक-परिसरे कृतम् अस्ति । शिल्प-महोत्सवे राष्ट्रिय-अन्ताराष्ट्रिय-तन्तुवायैः शिल्पकारैः च द्वादश-शततः अधिकानि आपणानि स्थापितानि सन्ति ।

# संस्कृति-पर्यटनमन्त्री त्र्यम्बकेश्वरे नूतनभवनस्य उद्घाटनं कृतवान्



संस्कृति-पर्यटनमन्त्री **गजेन्द्रसिंहशेखावतः** महाराष्ट्रस्य नासिकमण्डले त्र्यम्बकेश्वरे प्रशासनिकभवनस्य दर्शन-पङ्क्ति-मण्डपस्य च उद्घाटनं कृतवान्। एतन्निर्माणं निवृत्तिनाथमहाराज-आश्रमे पर्यटनमन्त्रालयस्य **'प्रसाद'** (PRASHAD) योजनान्तर्गतं कृतम् अस्ति।संस्कृति-पर्यटनमन्त्री अवदत् यत् आगामी-**कुम्भमेलां** दृष्ट्वा नासिक-त्र्यम्बकेश्वरयोः बृहत्स्तरे विकासकार्याणि प्रचलन्ति, सर्वाः परियोजनाः च शीघ्रमेव पूर्णताम् एष्यन्ति। सः विश्वासं प्रकटितवान् यत् अनया प्राथमिकतया भक्तेभ्यः पर्यटकेभ्यश्च उत्तमाः सुविधाः प्राप्स्यन्ति। मन्त्री महोदयः अकथयत् यत् विकासकार्याणि केवलं सौन्दर्यीकरणपर्यन्तं सीमितं न भविष्यन्ति, अपितु मार्गाः, पेयजलम्, स्वच्छता, यातायात-प्रबन्धनम् इत्यादिषु आवश्यक-आधारभूत-संरचनासु अपि ध्यानं दास्यते। कुम्भमेलायाः समये लक्षाधिकभक्तानां आगमनात् आधारभूतसुविधानां सुदृढीकरणं केन्द्र-राज्यसर्वकारयोः प्राथमिकता अस्ति।उद्घाटनसमारोहे राज्यस्य जलसंसाधनमन्त्री गिरीशमहाजनः, पूर्वसांसदः हेमन्तगोडसे, स्थानीयजनप्रतिनिधयः, प्रशासनिक-अधिकारिणः, सन्तयः, बहवः भक्ताः च उपस्थिताः आसन्।

# राज्यसभा-सांसद सुनेत्रा पवार महाराष्ट्रराज्यस्य प्रथम-महिला-उपमुख्यमन्त्रिरूपेण शपथं गृहीतवती



राज्यसभा-सांसद सुनेत्रा पवार महाराष्ट्रराज्यस्य प्रथम-महिला-उपमुख्यमन्त्रिरूपेण शपथं गृहीतवती। द्विषष्टि-वर्षीया (६२) सुनेत्रा राज्यस्य प्रथमा महिला उपमुख्यमन्त्री अभवत्। महाराष्ट्रस्य उपमुख्यमन्त्रिणः तस्याः पत्युः अजितपवार महोदयस्य अस्य सप्ताहस्य प्रारम्भे एकस्यां विमान-दुर्घटनायां दुःखदं निधनम् अभवत्।तदनन्तरम् दक्षिणमुम्बई-स्थित-विधानभवन-परिसरे 'राष्ट्रवादी-काँग्रेस-पक्षस्य' विधायकदलस्य गोष्ठी आयोजिता, यत्र सुनेत्रा पवार सर्वसम्मत्या दलस्य नेता चिता। तस्याः नाम्नः प्रस्तावं वरिष्ठः एनसीपी-नेता दिलीप वलसले पाटिलमहोदयः अकरोत्, यस्य समर्थनं खाद्य-नागरिक-आपूर्ति-मन्त्री छगन भुजबल महोदयः कृतवान्।प्रधानमन्त्री नरेन्द्र मोदी महाराष्ट्रस्य प्रथमा महिला उपमुख्यमन्त्री भवितुं सुनेत्रा पवारं प्रति अभिनन्दनं प्रकटितवान्। सामाजिक-माध्यम-सन्देशे प्रधानमन्त्रिणा विश्वासः प्रकटितः यत् सुनेत्रा पवार राज्यस्य जनानां कल्याणाय निष्ठया समर्पणेन च कार्यं करिष्यति तथा च दिवंगतस्य अजित पवार महोदयस्य परिकल्पनां (स्वप्नं) साकारं करिष्यति।

# मासिकधर्म-स्वास्थ्यम् मौलिक-अधिकारः सर्वोच्च-न्यायालयः



सर्वोच्च-न्यायालयः उक्तवान् यत् मासिकधर्म-स्वास्थ्यम् संविधानस्य अन्तर्गतं मौलिक-अधिकारः अस्ति। न्यायेन प्रतिपादितं यत् संविधानस्य अनुच्छेद-२१ इत्यस्य अधीनं मासिक-चक्रं 'जीवनस्य अधिकारे' तथा 'निजतायाः अधिकारे' (Right to Privacy) च अन्तर्निहितम् अस्ति। बालिकानां महिलानां च प्रतिष्ठां, स्वास्थ्यं, समानतां च सुनिश्चितं कर्तुं सर्वोच्च-न्यायालयेन राज्यान्, केन्द्रशासितप्रदेशान्, विद्यालयान् च प्रति अनेकाः निर्देशाः दत्ताः। सर्वोच्च-न्यायालयः सर्वान् राज्यान् केन्द्रशासितप्रदेशान् च निर्दिष्टवान् यत् सर्वेषु विद्यालयेषु बालिकाभ्यः निःशुल्कं 'बायोडिग्रेडेबल' (जैव-अपघटनीय) सैनिटरी-नेपकिन-वितरणं भवेत्। न्यायमूर्ति-जे.बी. पारदीवाला तथा आर. महादेवन इत्यनयोः पीठेन एकस्यां याचिकायां एषः महत्त्वपूर्णः निर्णयः श्रावितः। अस्यां याचिकायां बालिकाभ्यः विद्यालयेषु निःशुल्कं सैनिटरी-पैड-वितरणं तथा पर्याप्त-स्वच्छता-सुविधानां प्रदानेन सहिता अपेक्षा कृता आसीत्। न्यायालयः अधिकारिणः आदिष्टवान् यत् प्रत्येकस्मिन् विद्यालये बालकानां बालिकानां च कृते पृथक्-पृथक् प्रक्षालनगृहाणि (शौचालयाः) भवेयुः। न्यायालयेन इदमपि स्पष्टीकृतं यत् सर्वकारीय-निजी-शिक्षणसंस्थानां कृते अस्य आदेशस्य पालनं अनिवार्यम् अस्ति।

# देशे पञ्चविंशति-कोट्यधिकानि मृदा स्वास्थ्य-पत्राणि कृषकेभ्यः प्रदत्तानि




कृषकेभ्यः प्रदत्तानि । मृत्तिकायां पोषकतत्वानां क्षय-निवारणार्थं पञ्च-दशोत्तर-द्विसहस्रतमाब्दे सर्वकारेण मृत्तिका-स्वास्थ्य-पत्र-योजना आरब्धा। गतवर्षस्य जुलाई-मासपर्यन्तम् अस्याः योजनायाः अन्तर्गतं त्रिणवति-सहस्रतः अधिकेभ्यः कृषकेभ्यः प्रशिक्षणकार्यक्रमाः, षट्-लक्षात् अधिकाः क्षेत्रप्रदर्शन्यः, सहस्रशः जागरण-अभियानाः च आयोजिताः आसन् । सर्वकारः अवदत् यत् अनेन सन्तुलित-पोषण-प्रबन्धनस्य प्रोत्साहन-क्षेत्रे योजनायाः परिमाणं व्याप्तिः च प्रतिबिम्बयते । मृत्तिका-स्वास्थ्य-पत्रम् प्रतिवर्षं द्विवर्षेषु प्रदीयते तथा च कृषकाणां कृते तेषां मृत्तिकायाः पोषक-स्थिति-विषयकं, भौतिक-रसायनिक-स्थिति-विषयकं च विस्तृतं ज्ञानं प्रयच्छति।

# राष्ट्रिय-पात्रता-सह-प्रवेश-परीक्षा-स्नातकोत्तर (NEET-PG) तृतीय-चक्रस्य (Round 3) मन्त्रणा-प्रक्रिया (counselling) पुनः आरब्धा




स्वास्थ्य सेवा महानिदेशालय (DGHS) सूचितवान् यत् राष्ट्रिय-पात्रता-सह-प्रवेश-परीक्षा-स्नातकोत्तर (NEET-PG) तृतीय-चक्रस्य (Round 3) मन्त्रणा-प्रक्रिया (counselling) पुनः आरब्धा अस्ति। एकास्मिन् सामाजिक-माध्यम-सन्देशे महानिदेशालयेन उक्तं यत् मन्त्रणा-प्रक्रिया नूतन-पञ्जीकरणस्य सुविधया सह पुनः आरब्धा। पात्र-अभ्यर्थिभ्यः अधिकावसरान् प्रदातुं अतिरिक्त-आसनानि (seats) अपि सम्मिलितानि कृतानि सन्ति। पात्र-अभ्यर्थिनः मन्त्रणा-प्रक्रियायां सम्मिलितुं तदनुसारं विकल्पान् चयितुं च परामृष्टाः। अधिक-विवरणार्थं चिकित्सा-मन्त्रणा-समित्याः (MCC) जालपुटे सूचना उपलब्धा अस्ति।

# "सेल-e-BRATION: स्टील-टू-सोल" इति शीर्षकेण एका राष्ट्रव्यापी रचनात्मक-प्रतियोगिता आरब्धा

इस्पात-मन्त्रालयस्य अधीने महारत्न-सार्वजनिक-क्षेत्रस्य इकाई 'स्टील अथॉरिटी ऑफ इण्डिया लिमिटेड' (SAIL - सेल) इत्यनया संस्थया 'MyGov' इति तन्त्रांशस्य सहयोगेन "सेल-e-BRATION: स्टील-टू-सोल" इति शीर्षकेण एका राष्ट्रव्यापी रचनात्मक-प्रतियोगिता आरब्धा। एषा प्रतियोगिता देशवासिनः आकर्षक-'रील' (लघु-चलच्चित्र), सिनेमा-कथाः तथा संवादात्मक-डिजिटल-विज्ञापनानां माध्यमेन स्वकीयां कथा-वाचन-कलां (Storytelling) प्रदर्शयितुम् आमन्त्रयति। मन्त्रालयेन उक्तं यत् अस्य अभियानस्य उद्देश्यं प्रत्येकस्य भारतीयस्य दैनन्दिन-जीवने 'सेल' संस्थायाः अविभाज्य-भूमिकां प्रकाशितुं वर्तते।

# 'सर्वाणि- अवशिष्ट- विकासकार्याणि आगामी त्रिमासेषु पूर्णानि भवन्तु'- मुख्यमन्त्रिणः अधिकारिभ्यः निर्देशाः



**हिमसंस्कृतवार्ताः- शिमला ।** मुख्यमन्त्री सुखविन्द्रसिंह सुक्खु शनिवासरे राज्यस्य ग्रामीणक्षेत्राणां स्वीकृतविभिन्न क्षेत्रीययोजनानां प्रगत्यां समीक्ष्यत। अस्मिन् अवसरि ते विभागेभ्यः निर्देशं दत्तवन्तः यत् सर्वे अवशिष्ट विकासकार्याणि आगामी त्रिमासिके पूर्णानि भविष्यन्ति।तेन उक्तं यत् हिमाचलप्रदेशे लगभग ९० प्रतिशतजनसंख्या ग्रामीणक्षेत्रेषु वसति। अतः राज्ये ग्रामीणविकासाय विशेषं ध्यानं प्रदत्तम्। ग्रामीणक्षेत्रेषु समग्रविकासेन राज्यस्य सतत् समावेशकविकासः प्रतिपद्यते। अत्र विविधक्षेत्रीयकार्येषु धनराशेः स्वीकृतिः, परन्तु परियोजनायाः विलम्बः शनैः प्रवाहः समीक्षितः। एतेषु दुर्गमक्षेत्रेषु उपयोजना, एमपीएलएडी, विधायक- क्षेत्रविकास- निधियोजना, लोकल एरिया डेवलपमेंट फंड, मुख्यमन्त्री ग्रामपथयोजना, अन्याः विधायक- आधारित योजनाः सम्मिलिताः।मुख्यमन्त्रिणा चिंता प्रकटिता यत् अल्पतरः किन्तु आवश्यकः कार्यः– हस्तपम्प प्रतिष्ठापनम्, पादपथाः, नालिकाः, सामुदायिक भवनानि, रिटेनिंग वॉल, फुटब्रिज, सिंचाई नद्यः, चारदीवारी च ग्रामपथाः इत्यादीनि– अवशिष्टानि सन्ति। ते विकेन्द्रिताः, आवश्यकता- आधारिताः च कार्याः स्थानीयजनैः प्रत्यक्षं सम्बद्धाः सन्ति, ग्रामीण- अधोसंरचनायाश्च दृढतां कुर्वन्ति। मुख्यमन्त्री उक्तवन्तः यत् वर्तमानसर्वकारस्य गठनात् परं व्यवस्थापरिवर्तनस्य सिद्धान्तम् आत्मसात्य प्रणालीगताः असंतुलनानि परिष्कृयन्ते, ग्रामीणविकासप्रणाली पुनःस्थाप्यते। अतीतेषु, अल्पतराः कार्याणि दीर्घसमयम् अवशिष्टानि, यद्यपि तेषां वित्तं विभागेभ्यः प्रदत्तम्।मुख्यमन्त्री विस्तृततया उक्तवन्तः– ११,०६४ क्षेत्रीयकार्याणि, येषाम् अनुमानितराशिः २०४ कोटि आसीत्, आरब्धानि नासन्। १६,८३४ दीर्घकालीननिर्माणाधीन कार्येषु अनुमानितराशि ३४८ कोटि आसीत्। अक्टूबर २०२५ तः १५ जनवरी २०२६ पर्यन्तं १८,२६२ कार्याणि, लघु योजनाः च पूर्णाः, येन ग्रामीणजनाः लाभान्विताः।मुख्यमन्त्री उक्तवन्तः यत् विकासकार्याणां प्रगति रियल- टाइम डैशबोर्डेन निगद्या, तथा फील्ड- अधिकारेभ्यः दैनिकरिपोर्ट दातव्यं निर्देशितम्।सर्वे विभागाः– जलशक्ति, लोकनिर्माण, खण्डविकास कार्यालयः, पंचायताः च– निर्देशिताः यत् स्वीकृताः अवशिष्टकार्याणि शीघ्रं पूर्णानि भवन्तु। सचिवयोजना डॉ. अभिषेक जैन विस्तृतप्रगति रिपोर्ट इति अददत्। ११,०६४ कार्येषु ९,६८९ कार्याणि १७७ कोटिरूप्यकाणां राशिः त्रिमासेषु पूर्णानि।दीर्घकालीननिर्माणाधीन १६,३८४ कार्येषु ८,५७३ कार्याणि १५९ करोडरूप्यकाणां लागतिः पूर्णानि। शेषकार्याणि आगामी त्रिमासेषु पूर्णानि भविष्यन्ति। विभिन्नजिलासु फील्डविजिट तथा समीक्षा सभाः आयोज्यन्ते। लंबित- उपयोगिताप्रमाणपत्राणि अपि प्राप्तानि। मुख्यमन्त्री उक्तवन्तः यत् सर्वकारव्यवस्था परिवर्तनानुसारम् अवशिष्टकार्याणि शीघ्रं पूर्णत्वाय, सार्वजनिकधनस्य सर्वोत्तमोपयोगः च सुनिश्चितयितुं प्रतिबद्धा अस्ति, यत् विकासलाभः प्रत्येकग्रामे तथा समाजस्य प्रत्येकवर्गे प्राप्यते।

# चतुर्थचरणस्य बी.पी.एल. सर्वेक्षणम् आरप्स्यते,

## मुख्यमन्त्रिणा अधिकारिणः निर्देशिताः




**हिमसंस्कृतवार्ताः- शिमला।** राज्ये दारिद्र्यरेखातः अधः स्थितानाम् (बी. पी. एल.) परिवाराणां परिचयार्थं प्रवर्तमानं यद् अभियानम् अस्ति, तस्य अन्तर्गतं बी. पी. एल. सर्वेक्षणस्य चतुर्थचरणम् अग्रिम-रविवासराद् आरभ्यते। अस्य विषये मुख्यमन्त्री सुखविन्दरसिंह सुक्खुमहोदयः शनिवासरे अत्र ग्रामीणविकास– पञ्चायतीराजविभागस्य अधिकारिभिः सह आयोजितायाः सभायाः अध्यक्षतां कृत्वा अधिकारिणः निर्देशितवान् यत् बी. पी. एल. परिवाराणां परिचयार्थं सर्वेक्षणस्य चतुर्थचरणं प्रथम-फरवरी-तिथेः आरभ्यताम्।मुख्यमन्त्रिणा उक्तं यत् राज्यसरकारस्य उद्देश्यं प्रत्येकं पात्रस्य निर्धनपरिवारस्य नाम बी. पी. एल. सूचीमध्ये समावेशयितुम् अस्ति, येन ते सर्वकारेण सञ्चालितानां विविधानां कल्याणकारी-योजनानां लाभं प्राप्नुयुः। तेन अपि कथितं यत् एतत् सर्वेक्षणं पञ्चसु चरणेषु सम्पाद्यते, येन कश्चन अपि आवश्यकताग्रस्तः परिवारः वञ्चितो न भवेत्। तेन उक्तं यत् सर्वेक्षणस्य प्रथमत्रिषु चरणेषु राज्ये सर्वत्र समग्रतया ५९,८२९ परिवाराः बी. पी. एल. सूचीमध्ये समाविष्टाः सन्ति।जिलानुसारं प्राप्तविवरणानाम् अनुसारं बिलासपुरे २,२०४, चम्बायां १३,७८६, हमीरपुरे ३,४८०, कांगड़ायां १०,८०७, किन्नौरे १,१०९, कुल्लू-जनपदे २,९५७, लाहौल–स्पीतौ २०६, मण्ड्यां १२,०४५, शिमलायां ४,५२२, सिरमौरे १,२७७, सोलने १,५६७, ऊनायां च ५,८६९ परिवाराः बी. पी. एल. इति घोषिताः सन्ति।अस्यां सभायां ग्रामीणविकास–पञ्चायतीराजमन्त्री अनिरुद्धसिंहः, विधायकः चन्द्रशेखरः, मुख्यमन्त्रिणः सचिवः राकेशकंवरः, सचिवः अमरजीतसिंहः, निदेशकः राकेशप्रजापतिः तथा अन्ये वरिष्ठाः अधिकारिणः अपि उपस्थिताः आसन्।

# HP Panchayat Election: सर्वकारेण पंचायतेषु प्रशासकाः नियुक्ताः, विभिन्न समितीनां सङ्घटनं कृत्वा अधिसूचना प्रकाशिता

**हिमसंस्कृतवार्ताः शिमला।** हिमाचल प्रदेशे पञ्चायतीराज संस्थानां कार्यकालस्य शनिवासरे अन्तिमः दिवसः आसीत्। कार्यकालसमाप्तौ एताः संस्थाः निरस्ता इति मन्यन्ते। प्रथम फरवरीतः पञ्चायतीराज संस्थानां सर्वाः शक्तयः प्रशासकानां हस्तेषु गमिष्यन्ति। एतद् दृष्ट्वा शनिवासरे राज्यसर्वकारेण प्रशासकानां नियुक्तिः कृता अस्ति। अस्मिन् विषये पञ्चायतीराज विभागेन अधिसूचना प्रकाशिताऽस्ति।

अधिसूचनानुसारं समितीनां गठनं कृत्वा ग्रामपञ्चायतानां, पञ्चायत समितीनां, जिला परिषदां सर्वेषां कार्याणां शक्तीनां च प्रयोगः क्रियते। एतेन सह फरवरी मासात् पञ्चायतीराज विभागेन निर्गताः मुद्राः अपि औचित्यहीनाः भविष्यन्ति। पंचायतासु विकासकार्याणां पर्यवेक्षणं, नूतनकार्याणाम् आयोजनं प्रशासकैः एव करिष्यते।

## समितीनां कार्यविधानम्

ग्रामपञ्चायतानां कृते खण्ड- विकास- अधिकारी समितेः अध्यक्षः नियुक्तः अस्ति, पञ्चायत सचिवः सदस्यसचिवः भविष्यति। तथैव पञ्चायत समितेः कृते मुख्यकार्यकारी अधिकारी अध्यक्षः, सामाजिकशिक्षा एवं खण्डयोजना- अधिकारी सदस्यः भविष्यति। एतत् पदं रिक्तं सति खण्ड- विकास- अधिकारिणाऽभिहितः अधिकारी सदस्यः भविष्यति। सदस्यसचिवरूपेण पञ्चायतनिरीक्षकः अथवा उपनिरीक्षकः नियुक्तः भविष्यति।जिला परिषदस्य कृते समितौ मुख्य कार्यकारी अधिकारी अध्यक्षः, जिला- विकास- अधिकारी सदस्यः, जिलापंचायत- अधिकारी सदस्यसचिवः नियुक्तः अस्ति। केन्द्रीय- वित्त- आयोगस्य अनुदानसम्बन्धेषु भुगतानार्थं सदस्य सचिवः 'मेकर' तथा समितेः अध्यक्षः 'चेकर' भविष्यति।विभागस्य कथनानुसारं सम्पूर्णे हिमाचलप्रदेशे विद्यमानानां निर्वाचित पञ्चायतीराज प्रतिनिधीनां कार्यकालः (लाहौल-स्पीति जनपदस्य केलाङ्ग उपमण्डले सर्वाः ग्रामपञ्चायताः तथा पञ्चायत समितयः, चम्बा मण्डलस्य पांगी उपमण्डले ग्रामपञ्चायताः, पञ्चायतसमितयः, कुल्लू मण्डलस्य चतस्रः ग्रामपञ्चायताः वर्जयित्वा) 31 जनवरी दिनांके समाप्तः अभवत्। आपदा प्रबन्धन अधिनियमः 2005 प्रवर्तितः सन् ग्रामपञ्चायतानां, पञ्चायत समितीनां, जिला परिषदां पुनर्गठनार्थं च निर्वाचनं न जातम्। अतः प्रदेश पञ्चायतीराज अधिनियमानुसारं कार्यकालसमाप्तौ एताः संस्थाः भङ्गाः इति मन्यन्ते।




## हिमाचल प्रदेशे मतदातॄणां संख्या

राज्य निर्वाचन आयोगस्य अनुसारं हिमाचलप्रदेशे 55.19 लक्षं मतदातारः सन्ति। एतेषु 27,93,161 पुरुषाः तथा 27,26,548 महिलाः सन्ति। कांगड़ा जनपदे 13,17,390, बिलासपुरे 3,30,655, चम्बायां 4,22,091, हमीरपुरे 3,78,151, किन्नौरे 5,887, कुल्लू जनपदे 3,35,042, लाहौलस्पीतौ 25,602, मण्ड्यां 8,65,432, शिमलायां 5,17,149, सिरमौरे 4,11,481, सोलने 4,20,552 ऊनायां च 4,37,287 मतदातारः सन्ति।

# केन्द्रसर्वकारस्य जनसामान्यबजटं रविवासरे, केन्द्रात् हिमाचलप्रदेशाय चतस्रः मुख्यापेक्षाः

## प्रदेशहितविषयेषु वित्तमन्त्रिणा सह मुख्यमन्त्रिणा पूर्वमेव संवादः कृतः




**हिमसंस्कृतवार्ताः- शिमला।**
केन्द्रस्य मोदी-सर्वकारः रविवासरे संसदि अग्रिमम् सामान्यबजटम् उपस्थापयिष्यति। रेल-बजटम् अपि अस्यैव बजटस्य भागः भविष्यति। अस्मिन् बजटे हिमाचलप्रदेशस्य अपेक्षाः श्रूयन्ते वा न वा, इति निर्णयोऽपि रविवासरे एव ज्ञास्यते। केन्द्रीयबजटात् पूर्वमेव मुख्यमन्त्री सुखविन्दरसिंहसुक्खु महोदयः दिल्लीनगरे केन्द्रीयवित्तमन्त्रिणा सह मेलनं कृतवान्, अस्मिन् अवसरे हिमाचलप्रदेशस्य पक्षतः चत्वारः प्रमुखाः विषयाः प्रस्तुताः। तेषु राजस्वहानि-अनुदानम्, ऋणसीमा, हरितनिधिः (ग्रीन फण्ड) तथा आपदा- आश्रय- विषयाः प्रमुखाः आसन्।राज्यस्य कृते चिन्तनीयः विषयोऽयम् अपि अस्ति यत् अद्यापि षोडशस्य वित्तायोगस्य (16th Finance Commission) अनुशंसाः प्रकाशिताः न सन्ति। यद्यपि तस्य प्रतिवेदनं राष्ट्रपतये समर्पितम् अस्ति तथा वर्तमानकाले वित्तमन्त्रालये विचाराधीनम् अस्ति। अतः प्रथम-फरवरी-तिथेः सामान्यबजटम् अत्यन्तं महत्त्वपूर्णं जातम्। अस्माद् बजटात् पूर्वं मुख्यमन्त्रिणा वित्तमन्त्रिणः समीपे पर्वतीयराज्येषु (Hill States) विशेषप्रावधानानां दृढा याचना अपि कृता।

### केन्द्रस्य समक्षं हिमाचलप्रदेशेन प्रस्तुताः प्रमुखाः अपेक्षाः

**१. राजस्वहानि-अनुदानस्य वृद्ध्यर्थं आग्रहः-**
मुख्यमन्त्रिणा केन्द्रीयवित्तमन्त्रिणः समक्षं निवेदनं कृतं यत् हिमाचलप्रदेशस्य राजस्वहानि-अनुदानं न्यूनतमं प्रतिवर्षं १०,००० कोटि-रूप्यकाणि निश्चितं क्रियताम्, येन राज्यस्य वित्तीय-संकटानां समाधानं कर्तुं शक्येत। राजस्वहानि-अनुदानं तद् धनराशिः अस्ति, या केन्द्रसर्वकारः राज्यस्य राजस्वव्ययस्य आयस्य च अन्तरं पूरयति।

### २. पर्वतीयराज्येभ्यः पृथक् हरितनिधेः निर्माणम्-

मुख्यमन्त्रिणा उक्तं यत् हिमाचलवत् हिमालयीयप्रदेशाः पर्यावरणसंरक्षणे, वनसंवर्धने, पारिस्थितिकी-रक्षणे तथा प्राकृतिकसाधन-संरक्षणे महत्त्वपूर्णां भूमिकां वहन्ति। अतः पर्वतीयराज्येभ्यः प्रतिवर्षं ५०,००० कोटि-रूप्यकाणां हरितनिधिः (ग्रीन फण्ड) निर्मीयताम्, येन पर्यावरणमित्राणि हरित-पर्वतीय-विकासकार्याणि वित्तीयसहाय्यां प्राप्नुयुः।

**३. आपदा-संकटार्थं पृथग् आबण्टनम्-**
मुख्यमन्त्रिणा कथितं यत् हिमालयीयप्रदेशाः प्राकृतिक-आपद्भ्यः अत्यन्तं संवेदनशीलाः सन्ति। अतः डिजास्टर-रिस्क-इण्डेक्सः हिमाचलवत् पर्वतीयराज्येभ्यः पृथक् निर्मातव्यः, बजटे च तदर्थं विशेषसंसाधनानि विनियोजनीयानि। वर्तमानव्यवस्थायां सुनामी- भूकम्पयोः लाभः अधिकः, जलोप्लवे तु न्यूनः अस्ति।

### ४. निर्धारितसीमातः अधिकऋणग्रहणस्य अनुमतिः-

हिमाचलप्रदेशस्य वित्तीयस्थितिं दृष्ट्वा मुख्यमन्त्रिणा अनुरोधः कृतः यत् सकल-राज्य-उत्पादस्य (GSDP) अतिरिक्तं द्विप्रतिशतपर्यन्तं ऋणग्रहणस्य अनुमतिः दीयताम्, येन विकासपरियोजनाः तथा आधारभूत-संरचनात्मककार्याणि शीघ्रं सम्पन्नानि भवेयुः। एषा ऋणसीमा एफ. आर. बी.एम. अधिनियमेन निश्चिताऽस्ति, यस्य पालनं राज्यैः करणीयम्। प्राकृतिक-आपत्सु अभवत् क्षतिना वर्तमानऋण-सीमा अपर्याप्ता सिद्धा भवति। राज्यसभा-सांसद सुनेत्रा पवार महाराष्ट्रराज्यस्य प्रथम-महिला-उपमुख्यमन्त्रिरूपेण शपथं गृहीतवती। द्विषष्टि-वर्षीया (६२) सुनेत्रा राज्यस्य प्रथमा महिला उपमुख्यमन्त्री अभवत्। महाराष्ट्रस्य उपमुख्यमन्त्रिणः तस्याः पत्युः अजितपवार महोदयस्य अस्य सप्ताहस्य प्रारम्भे एकस्यां विमान-दुर्घटनायां दुःखदं निधनम् अभवत्।तदनन्तरम् दक्षिणमुम्बई-स्थित-विधानभवन-परिसरे 'राष्ट्रवादी-काँग्रेस-पक्षस्य' विधायकदलस्य गोष्ठी आयोजिता, यत्र सुनेत्रा पवार सर्वसम्मत्या दलस्य नेता चिता। तस्याः नाम्नः प्रस्तावं वरिष्ठः एनसीपी-नेता दिलीप वलसले पाटिलमहोदयः अकरोत्, यस्य समर्थनं खाद्य-नागरिक-आपूर्ति-मन्त्री छगन भुजबल महोदयः कृतवान्।प्रधानमन्त्री नरेन्द्र मोदी महाराष्ट्रस्य प्रथमा महिला उपमुख्यमन्त्री भवितुं सुनेत्रा पवारं प्रति अभिनन्दनं प्रकटितवान्। सामाजिक-माध्यम-सन्देशे प्रधानमन्त्रिणा विश्वासः प्रकटितः यत् सुनेत्रा पवार राज्यस्य जनानां कल्याणाय निष्ठया समर्पणेन च कार्यं करिष्यति तथा च दिवंगतस्य अजित पवार महोदयस्य परिकल्पनां (स्वप्नं) साकारं करिष्यति।

# एकोनचत्वारिंशत्तमः (३९) भारतीय-अन्तर्राष्ट्रीय-चर्म-मेला अद्य चेन्नई-नगरे आरभ्यते

एकोनचत्वारिंशत्तमः (३९) भारतीय-अन्तर्राष्ट्रीय-चर्म-मेला अद्य चेन्नई-नगरे आरभ्यते। अस्मिन् त्रिदिवसीय-मेले चर्म-उत्पादानां, यन्त्राणां, उपकरणानां च प्रदर्शनं भविष्यति। एषः मेलापकः विनिर्माण-कल्पनायां (Design) तथा दत्त-विश्लेषणे (Data analysis) कृत्रिम-मेधा-अनुप्रयोगानां (AI Applications), नवीन्तम-तन्त्रांशानां (Software) तथा अङ्कीय-उद्यमानां (Digital enterprises) सदृशानां अत्याधुनिक-प्रौद्योगिकीनां अपि प्रदर्शनं करिष्यति। अस्य आयोजनं तादृशे समये भवति, यदा भारतं यूरोप-महाद्वीपः च एकां नूतनां वैश्विक-व्यवस्थां निर्मातुं प्रयतमानौ स्तः। सम्प्रति सञ्जातः 'मुक्त-व्यापार-सन्धिः' वस्तुषु शुल्क-न्यूनतां कृत्वा, सेवा-क्षेत्रस्य व्याप्तिं वर्धयित्वा, निवेशं च प्रोत्साहितुं चर्म-सम्बद्ध-उद्योगेषु आर्थिक-विकासं प्रवर्धयिष्यति। अस्मिन् मेलापके ३६२ (द्विषष्ट्यधिक-त्रिशत) भारतीय-प्रतिष्ठानानि तथा ६६ (षट्षष्टिः) वैदेशिक-सहभागिनः भागं ग्रहीष्यन्ति। प्रतिभागी-देशेषु जर्मनी, इटली, ऑस्ट्रेलिया, अर्जेण्टीना, चीन, इथियोपिया, यूके (ब्रिटेन), संयुक्त-अरब-अमीरात (UAE), नीदरलैण्ड तथा सऊदी-अरब इत्यादयः सम्मिलिताः सन्ति।

# गणतन्त्रदिवसस्य भव्यं परेड-आयोजनं भारतस्य 'विविधतायाम् एकता' इत्यस्य जीवन्तं प्रमाणं वर्तते-उपराष्ट्रपतिः सी. पी. राधाकृष्णन्

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् महोदयः उक्तवान् यत् सप्तसप्ततितमस्य (७७) गणतन्त्रदिवसस्य भव्यं परेड-आयोजनं भारतस्य 'विविधतायाम् एकता' इत्यस्य जीवन्तं प्रमाणं वर्तते। नवदिल्ल्यां 'भारत-पर्व २०२६' इत्यस्य समापन-समारोहे श्रीराधाकृष्णनः अवदत् यत् एषः तादृशः अनुभवः अस्ति यः राष्ट्रस्य शाश्वत-भावनां प्राणवन्तीं करोति। अस्य पर्वणः माध्यमेन प्रत्येकं राज्यं क्षेत्रं च स्वकीयां विशिष्टां गाथां वर्णयति। उपराष्ट्रपतिणा कथितं यत् गणतन्त्रदिवसस्य परेड-प्रदर्शनी राष्ट्रस्य सम्प्रभुतां सुरक्षां च प्रति अटूट-प्रतिबद्धतायाः पुष्टिं करोति। सः उक्तवान् यत् अस्य वर्षस्य विशेषं राष्ट्रियं महत्त्वं वर्तते यतः राष्ट्रं 'वन्दे मातरम्' इत्यस्य सार्धशततमीं (१५०) वर्षगाण्ठं (जयन्तीं) आचरति। श्रीराधाकृष्णनः अवदत् यत् भारत-पर्व केवलम् उत्सवः न, अपितु भारतस्य कालातीत-चेतनायाः साक्षात्कारः अपि अस्ति। एतत् पर्व संवैधानिक-मूल्यैः सह गभीररूपेण सम्बद्धं वर्तते, यत् विविधतायाम् एकतां दर्शयति।श्रीराधाकृष्णनः प्रतिपादितवान् यत् भारत-पर्व प्रधानमन्त्रिणः नरेन्द्रमोदी महोदयस्य दृष्टिकोणं अपि प्रतिबिम्बयति, येन भारतस्य सांस्कृतिक-उत्तराधिकारः राष्ट्रिय-गौरवस्य, सामाजिक-एकतायाः, आर्थिक-अवसराणां च स्रोतः इति वर्णितः। एतत् पर्व देशस्य परम्पराः, व्यञ्जनानि, कलात्मक-अभिव्यक्तीः च एकत्र आनीय 'एकं भारतं श्रेष्ठं भारतम्' इत्यस्य तत्त्वं प्रदर्शयति।उपराष्ट्रपतिः उक्तवान् यत् यथा यथा देशः 'अमृतकालस्य' दिशि वर्धते, तथा तथा भारतं आधारभूत-संरचनायाः विस्तारे, अङ्कीय-सशक्तिकरणे (Digital empowerment), वित्तीय-समावेशने, सामाजिक-सुरक्षायां, महिला-नेतृत्व-विकासैः तथा युवा-प्रेरित-नवाचारेषु च परिवर्तनं पश्यति।

# कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयस्य नवत्रिंशत् (३९) विद्यार्थिनां 'इम्वर्स ए. आई.' संस्थायां प्रशिक्षुतायै चयनम्



**हिमसंस्कृतवार्ताः- डॉ. रेणुका बोकारे, नागपुरम्।**कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयस्य, रामटेकस्थस्य, प्रशिक्षुता-प्रकोष्ठ विभागेन राष्ट्रीयशिक्षानीतेः (एन. ई. पी. २०२०) उद्देश्यानुसारेण दिनाङ्के २० तथा २८ जनवरी २०२६ तमे दिनांके प्रशिक्षुतायै द्वे परिसर- साक्षात्कार- कार्यक्रमे सफलतया आयोजिते।एते परिसर- साक्षात्काराः शास्त्री, आचार्य, बी. ए. संस्कृतं, एम. एस्सी. यौगिक-साइन्स पाठ्यक्रमेषु अध्ययनेन संलग्नानां विद्यार्थिनां कृते आयोजिताः आसन्। अयं कार्यक्रमः इम्वर्स ए.आई. संस्थया तस्य भारतकेन्द्रितोपक्रमेण 'भारतीय जी.पी.टी.' इत्यनेन सहकारेण सम्पन्नः। एते संस्थे उन्नत- कृत्रिमबुद्धिमत्ता- प्रौद्योगिकीम् उपयुज्य भारतीय- हस्तलिखितानां संरक्षणे डिजिटलीकरणे च कार्यं कुर्वन्ति।अयं प्रशिक्षुता-कार्यक्रमः हस्तलिखितानां तथा परम्परागत- संस्कृतज्ञानस्य विषये केन्द्रितः अस्ति। अस्य अन्तर्गतं संस्कृतविद्यार्थिनः प्राचीन- हस्तलिखितानां संरक्षणे, प्रलेखने, डिजिटलीकरणप्रक्रियायां च सक्रियतया सहभागीभवन्ति। एषः अनुभवात्मकः अधिगमः विद्यार्थिनां संशोधनकौशलानां डिजिटलकौशलानां च विकासं करोति, परम्परागतज्ञानप्रणालीषु उन्नत- अकादमिक- अनुसन्धानाय दृढम् आधारं च प्रददाति।

प्रथमचरणे पञ्चत्रिंशत् (३५) विद्यार्थिनः साक्षात्कारे भागं गृहीतवन्तः, तेषु त्रयोविंशतिः (२३) विद्यार्थिनः चयनिताः। द्वितीयचरणे द्वाविंशतिः (२२) विद्यार्थिनः उपस्थिताः, तेषु सुव्यवस्थित- मूल्यांकन- प्रक्रियानन्तरं षोडश (१६) विद्यार्थिनः चयनिताः। एवं समग्रतया नवत्रिंशत् (३९) विद्यार्थिनः प्रशिक्षणार्थं चयनिताः सन्ति, येषां कृते राष्ट्रीयशिक्षानीतेः (एन. ई. पी. २०२०) अनुभवात्मक- शिक्षण- रूपरेखायाः अन्तर्गतं व्यावहारिकं प्रशिक्षणं प्रदास्यते। अस्य कार्यक्रमस्य प्रभावी समन्वयनं प्रशिक्षुताप्रकोष्ठ- समन्वयकाभ्यां डॉ. श्वेता शर्मा, डॉ. आशीष जे. महोदयाभ्यां कृतम्।संस्कृतविद्वत्ताम् अत्याधुनिकया कृत्रिमबुद्धिमत्ता- प्रौद्योगिक्या सह संयोजयन् कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयः न केवलं भारतस्य बौद्धिक-परम्परायाः संरक्षणं करोति, अपि तु परम्परागतज्ञानं भविष्यं प्रति नेतुं समर्थानां शोधकर्तॄणां नवसन्ततिं निर्माति।

# "सुभाषित-रसास्वादः"

**"प्रहेलिका""विनायकपतेः शत्रुस्तस्य नाम षड्क्षरम्।**
**पूर्वार्धं तव राजेन्द्रम् उत्तरार्धं तु वैरिणाम्।।"**

अर्थः- षट् अक्षराणि नाम्नि यः विनायकपतिरिपुः, यस्य प्रथमार्धे भवतः नाम अस्ति। उत्तरार्धे च तव शत्रुनाम विद्यते। तर्हि सः कः?

गूढार्थः- विनायकपतेः इति अस्य शब्दस्य विश्लेषणं (विग्रहम्) वि+नायकः+पतेः भवति। विना नायकस्य पतेः= खगानां नायकः गरूडः तस्य स्वामी विष्णुः अभिप्रेतम्। विष्णोः शत्रुः 'हिरण्यकश्यपु' अस्य नामस्य षट् अक्षराणि सन्ति। तस्य नामस्य प्रथमार्धं 'हिरण्यम्' एषः विष्णोः नाम अस्ति। उत्तरार्धश्च कूर्म इव स्वपिति, एतत् तस्य शत्रुनाम्। अतः उत्तरं हिरण्यकश्यपु अस्ति।

**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**

# वार्ता-संवादः

नन्दिनीः नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि।
नमस्ते काव्ये।
नन्दिनीः जैम्स्-वेब्-दूरदर्शकेन ब्रह्माण्डस्य प्रथमानि नक्षत्राणि दृष्टानि।
काव्याः अतीव आश्चर्यम्! एतानि नक्षत्राणि अस्मभ्यं पुरातन-रहस्यं कथयिष्यन्ति। रोचेस्टर- विश्वविद्यालये वैज्ञानिकैः किमपि अद्भुतं लोहं प्राप्तम्। तत् छिद्रयुक्तं चेदपि जले न निमज्जति।
नन्दिनीः सत्यम्, एषा पद्धतिः नौकानिर्माणे उपयोगिनी भविष्यति। अपि च, लास-अञ्जल-नगरे गृहस्य अधः एकः पञ्चाशदधिक- द्विशत- किलो- परिमितः ऋक्षः प्राप्तः। सः तत्र सुखेन सुप्तः।
काव्याः ऋक्षस्य गृहं तु विशालं वर्तते! अन्ते एका हास्यकरी वार्ता। प्रबन्धकेन कार्यकाले अन्तर्जालपुटं पठन् एकः युवकः दृष्टः। अतः तस्य वेतनं कर्तितुं प्रबन्धकेन तर्जितम्।

**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

# इण्डोनेशियाराष्ट्रस्य बालीस्थे भारतीय- प्रधान- कोंसलावासे ऐषमः सप्तसप्ततितमः भारतीयगणतन्त्रदिवसः सोत्साहं समाचरितः




गणतन्त्रदिवसमुपलक्ष्य CGI (Consulate General of India), CG (Consul General) भारतीयमहावाणिज्यदूतेन डॉ. शशाङ्कविक्रममहोदयेन ( Indian Council for Cultural Relations) SVCC, BALI भारतीय- सांस्कृतिक- सम्बन्धपरिषदः, बालीस्थ- स्वामिविवेकानन्दकेन्द्र- निदेशकेन नवीनमेघवालमहोदयेन च केन्द्रीय- संस्कृत- विश्वविद्यालयस्य मुक्तस्वाध्यायपीठस्य संस्कृताध्ययनकेन्द्रस्य संस्कृतभाषाशिक्षकः आचार्यः विशालप्रसादभट्टः सम्मानितः

हिमसंस्कृतवार्ताः- बाली, इण्डोनेशिया। जनवरीमासस्य षड्विंशतितमे दिनाङ्के इण्डोनेशियाराष्ट्रस्य बालीस्थे भारतीय- प्रधान- वाणिज्यदूतावासे भारतीयजनैः ऐषमः सप्तसप्ततितमः गणतन्त्रदिवसः सश्रद्धं समाचरितः। तत्रादौ महावाणिज्यदूतः डॉ. शशाङ्कविक्रमः ध्वजारोहणं कृतवान्। तदनु सर्वैः भारतीयैः सम्भूय राष्ट्रगानं विहितम्। अनन्तरं गणतन्त्रदिवसकार्यक्रमस्य मुख्यातिथिः भारतीयमहावाणिज्यदूतः डॉ. शशाङ्कविक्रमः सर्वेभ्यः गणतन्त्रदिवसस्य शुभकामनाः प्रयच्छन् स्वीयोद्बोधने भारतसर्वकारस्य विविधराष्ट्रकल्याण- परियोजनानां विषये भारत- इण्डोनेशियादेशयोः परस्परं सांस्कृतिकसम्बन्धविषये च सविस्तरं प्रोक्तवान्। तदनु भारतीय- सांस्कृतिक- सम्बन्धपरिषदः स्वामिविवेकानन्दकेन्द्रनिदेशकः नवीनमेघवालः स्वीयभाषणे भारतस्य स्वतन्त्रतासेनानिनां त्यागशौर्यवीर्यपराक्रमं संस्मारयन् तान् प्रति श्रद्धाञ्जलिं समर्पितवान्। तदनु नवीनमेघवालमहोदयः सारस्वतातिथिरूपेण समागतस्य नवदेहलीस्थ- केन्द्रीय- संस्कृत- विश्वविद्यालयस्य मुक्तस्वाध्यायपीठस्य संस्कृताध्ययनकेन्द्रस्य संस्कृतभाषाशिक्षकस्य आचार्यविशालप्रसादभट्टवर्यस्य स्वागतपरिचयं विधाय भारतीयसंस्कृतेः संस्कृतशिक्षणस्य च महत्ताविषये उद्बोधनाय सम्प्रार्थयत्। तदनन्तरं स्वीये सारस्वतभाषणे आचार्यविशालप्रसादभट्टेन सविस्तरं भारतीयसंस्कृतेः संस्कृतभाषायाश्च महत्त्वं प्रतिपाद्य केन्द्रीय- संस्कृत- विश्वविद्यालयस्य बालीस्थ- द्वीपान्तरसंस्कृतप्रतिष्ठाने सञ्चालितस्य संस्कृताध्ययन- कार्यक्रमस्य परिचयं विधाय सर्वेपि समुपस्थिताः जनाः संस्कृताध्ययनाय सम्प्रेरिताः। तदनु तेन सर्वेभ्यः समागतभारतीयेभ्यः गणतन्त्रदिवसस्य शुभकामनाः समर्पिताः। कार्यक्रमे विद्यालयीयच्छात्रैः विविधाः देशभक्तियुताः सांस्कृतिकप्रस्तुतयः प्रस्तुतीकृताः। तदनु भारतीयमहावाणिज्यदूतः CG. डॉ. शशाङ्कविक्रममहोदयः, SVCC निदेशकः नवीनमेघवालमहोदयश्च संस्कृतसेवाव्रतिने आचार्यविशालप्रसादभट्टस्य मङ्गलवस्त्रप्रदानेन पद्मश्री त्रिवेणीकवि- मिश्रोऽभिराजराजेन्द्र- सङ्कलितसम्पादित- कल्पवल्ली, समकालिक- संस्कृतकाव्य- सङ्कल्पना इत्याख्येन पुस्तकसमर्पणेन च सम्माननम् अकुरुताम्।